শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৰিতার্কিককেসরী।

ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৰিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## दशक - २

भगवद्रूपवर्णनम्

সূর্যস্পর্ধিকিরীটমূর্ধ্ৱতিলকপ্রোদ্ভাসিফালান্তরং
কারুণ্যাকুলনেত্রমার্দ্রহসিতোল্লাসং সুনাসাপুটম্।
গণ্ডোদ্যন্মকরাভকুণ্ডলযুগং কণ্ঠোজ্বলতকৌস্তুভং
ত্বদ্রূপং ৱনমাল্যহারপটলশ্রীৱতসদীপ্রং ভজে॥ ১ ॥

কেযূরাঙ্গদকঙ্কণোত্তমমহারত্নাঙগুলীযাঙ্কিত-
শ্রীমদবাহুচতুষ্কসঙ্গতগদাশঙ্খারিপঙ্কেরুহাম্।
কাঞ্চিত্ কাঞ্চনকাঞ্চিলাঞ্ছিতলসতপীতাংবরালম্বিনী-
মালম্বে ৱিমলাম্বুজদ্যুতিপদাং মূর্তিং তৱার্তিচ্ছিদম্॥ ২ ॥

যত্ত্রৈলোক্যমহীযসোপি মহিতং সম্মোহনং মোহনাত্
কান্তং কান্তিনিধানতোপি মধুরং মাধুর্যধুর্যাদপি।
সৌন্দর্যোত্তরতোপি সুন্দরতরং ত্বদ্রূপমাশ্চর্যতো-
প্যাশ্চর্যং ভুৱনে ন কস্য কুতুকং পুষ্ণাতি ৱিষ্ণো ৱিভো॥ ৩ ॥

তত্তাদৃঙমধুরাত্মকং তৱ ৱপুসসংপ্রাপ্য সংপন্মযী
সা দেৱী পরমোতসুকা চিরতরং নাস্তে স্বভক্তেষৱপি।
তেনাস্যা বত কষ্টমচ্যুত ৱিভো ত্বদ্রূপমানোজ্ঞক-
প্রেমস্থৈর্যমযাদচাপলবলাচ্চাপল্যৱার্তোদভূত্॥ ৪ ॥

লক্ষ্মীস্তাৱকরামণীযকহৃতৈৱেযং পরেষৱস্থিরে-
ত্যস্মিন্নন্যদপি প্রমাণমধুনা ৱক্ষ্যামি লক্ষ্মীপতে।
যে ত্বদধ্যানগুণানুকীর্তনরসাসক্তা হি ভক্তা জনা-
স্তেষৱেষা ৱসতি স্থিরৈৱ দযিত প্রস্তাৱদত্তাদরা॥ ৫ ॥

এৱং ভূতমনোজ্ঞতানৱসুধানিষ্যন্দসন্দোহনম্
ত্বদ্রূপং পৰচিদ্ৰসায়নময়ং চেতোহৰং শৃণ্ৱতাম্।
সদ্যঃ প্ৰেৰয়তে মতিং মদয়তে ৰোমাঞ্চয়ত্যঙ্গকং
ৱ্যাসিঞ্চত্যপি শীতবাষ্পৱিসৰৈৰানন্দমূৰ্চ্ছোদ্ভৱৈঃ॥ ৬ ॥

এৱংভূততয়া হি ভক্ত্যভিহিতো যোগঃ স যোগদ্বয়াত্
কৰ্মজ্ঞানময়াদভৃশোত্তমতৰো যোগীশ্বৰৈৰ্গীয়তে।
সৌন্দৰ্য়ৈকৰসাত্মকে ত্বয়ি খলু প্ৰেমপ্ৰকৰ্ষাত্মিকা
ভক্তিৰ্নিশ্ৰমমেৱ ৱিশ্বপুৰুষৈৰ্লভ্যা ৰমাৱল্লভ॥ ৭ ॥

নিষ্কামং নিয়তস্বধৰ্মচৰণং যত্ কৰ্ময়োগাভিধং
তদ্দূৰেত্যফলং যদৌপনিষদজ্ঞানোপলভ্যং পুনঃ।
তত্বৱ্যক্ততয়া সুদুৰ্গমতৰং চিত্তস্য তস্মাদ্বিভো
ত্বতপ্ৰেমাত্মকভক্তিৰেৱ সততং স্বাদীয়সী শ্ৰেয়সী॥ ৮ ॥

অত্যায়াসকৰাণি কৰ্মপটলান্যাচৰ্য নিৰ্যন্মলাঃ
বোধে ভক্তিপথেথৱাপ্যুচিততামায়ান্তি কিং তাৱতা।
ক্লিষ্টৱা তৰ্কপথে পৰং তৱ ৱপুৰ্ব্ৰহ্মাখ্যমন্যে পুন-
শ্চিত্তাৰ্দ্ৰত্বমৃতে ৱিচিন্ত্য বহুভিঃ সিধ্যন্তি জন্মান্তৰৈঃ॥ ৯ ॥

ত্বদ্ভক্তিস্তু কথাৰসামৃতঝৰীনিৰ্মজ্জনেন স্বয়ং
সিদধ্যন্তী ৱিমলপ্ৰবোধপদৱীমক্লেশতস্তন্বতী।
সদ্যঃ সিদ্ধিকৰী জয়ত্যয়ি ৱিভো সৈৱাস্তু মে ত্বতপদ-
প্ৰেমপ্ৰৌঢিৰসাৰ্দ্ৰতা দ্ৰুততৰং ৱাতালয়াধীশ্বৰ॥ ১০ ॥

★★★★★★★★★★